# Vishnuproktam Shivaradhanamahimavarnanam

# विष्णुप्रोक्तं शिवाराधनमहिमावर्णनम्

## Document Information

Text title : Vishnuproktam Shivaradhanamahimavarnanam

File name : viShNuproktaMshivArAdhanamahimAvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 161-203.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# विष्णुप्रोक्तं शिवाराधनमहिमावर्णनम्

(शिवरहस्यान्तर्गते उग्राख्ये)
विष्णुः (उवाच)
तावत्स्थास्यन्ति दुःखानि यावन्नाराध्यते शिवः ।
तावदेव महाव्याधिः यावन्नाराध्यते शिवः ॥ १६१॥

तावत्तिष्ठन्ति पापानि यावन्नाराध्यते शिवः ।
तावद्भवति दारिद्र्यं यावन्नाराध्यते शिवः ॥ १६२॥

यथा सूर्योदये जाते विनश्यति तमस्तथा ।
पूजिते श्रीमहादेवे दुःखमात्रं विनश्यति ॥ १६३॥

नानादुःखमहाव्याधिभेषजं शिवपूजनम् ।
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ १६४॥

नानासंसारदुःखानि नश्यन्ति शिवपूजया ।
सत्यं सत्यमिति प्राह जाबालोऽपि स्वयं विधे ॥ १६५॥

संसारजां रुजं रुद्रो द्रावयत्यर्चितः सदा ।
ततोऽर्चनीयमनिशं रुद्रलिङ्गं मुमुक्षुभिः ॥ १६६॥

सर्वमन्यत्परित्यज्य शिव एव शिवङ्करः ।
ध्येय इत्याह हि विधे साक्षादाथर्वणश्रुतिः ॥ १६७॥

पूजनीयो महारुद्रो मनोवाक्कायकर्मभिः ।
तत्पूजयैव नश्यन्ति दुःखानि विविधान्यपि ॥ १६८॥

विनाशयति संसारं सकृत्सम्पूजनाच्छिवः ।
भावपूतं महादेवं योऽर्चयिष्यति सन्ततम् ॥ १६९॥

स सम्प्राप्नोति धर्मार्थकाममोक्षान्न संशयः ।
संसारसागरं घोरं यः समुत्तर्तुमिच्छति ॥ १७०॥

तेन नित्यं महादेवः पूजनीयः प्रयत्नतः ।
धन्योऽसाविति विज्ञेय योऽन्वहं पूजयेच्छिवम् ॥ १७१॥

स तरत्येव संसारं नानापातकसागरम् ।
शिवेति नामदावाग्निर्महापापवनान्यपि ॥ १७२॥

भस्मसात्कुरुते सद्यः सत्यं सत्यं न संशयः ।
पापमूलानि दुःखानि विविधान्यपि तान्यतः ॥ १७३॥

शिवार्चनेन नाश्यानि पापानि निखिलन्यपि ।
पातकानि निवर्तन्ते यावन्ति शिवपूजया ॥ १७४॥

कतुं तावन्ति पापानि न शक्नोति नरः क्वचित् ।
संसारमूलभूतानां पातकानां चतुर्मुख ॥ १७५॥

शिवनामकुठोरण विनाशो जायते ध्रुवम ।
शिवनामामृतं पेयं पापचण्डांशुतापितैः ॥ १७६॥

पापदावाग्नितप्तानामस्ति नान्यत्परायणम् ।
शिवेति नामपीयूषवर्षधारापरिप्लुताः ॥ १७७॥

संसारदावमध्येऽपि न शोचन्ति न संशयः ।
येषां धर्मस्वभावानां महेशः कुलदैवतम् ॥ १७८॥

ते धन्यास्ते ममाराध्यास्ते महेशकृपाश्रयाः ।
न भक्तिः शङ्करे पूजा रागद्वेषरतात्मनाम् ॥ १७९॥

अनन्तजन्मभिर्येन तपस्तप्तं भविष्यति ।
तद्विधानां न सहसा मुक्तिर्भवति सर्वथा ॥ १८०॥

तस्यैव भक्तिर्भवति भवानीप्राणवल्लभे ।
जातापि शङ्करे भक्तिरन्यसाधारणी वृथा ॥ १८१॥

परन्त्वव्यभिचारेण शिवभक्तिः परेप्सिता ।
यस्यास्त्यामरणं शम्भौ भक्तिरव्यभिचारिणी ॥ १८२॥

तस्यैव मोक्षः सुलभो नान्यस्येति मतिर्मम ।
विधे भवन्ति प्रत्यूहाः शिवभक्तिविधातकाः ॥ १८३॥

प्रत्यूहास्ते शमं यान्ति महेशानुग्रहात्परात् ।
यस्य भक्तिरनुस्यूता देहपातान्तमीश्वरे ॥ १८४॥

स शिवान्यगृहीतात्मा न भवत्येव तादृशः ।
यस्य भक्तिर्महादेवे धारारूपाऽनुवर्तते ॥ १८५॥

नमस्तस्मै सर्वेशाय समित्राय चतुर्मुख ।
शिवौ पूज्यौ यथा नित्यं तथा पूज्यः शिवार्चकः ॥ १८६॥

शिवार्चकः शिवौ चेति त्रयः पूज्या ममान्वहम् ।
अनेकजन्मतपसा पूतः पुण्यौघसंश्रयः ॥ १८७॥

महादेवपरो भूत्वा यजति श्रीमहेश्वरम् ।
यस्य श्रीमन्महादेवे भक्तिरव्यभिचारिणी ॥ १८८॥

तस्य हृत्कमले(लं) साम्बः सर्वदाप्यधितिष्ठति ।
साम्वस्य श्री महेशस्य सन्निधिर्यत्र सर्वदा ॥ १८९॥

न तस्य पापलेशोऽस्ति सत्यं सत्यं न संशयः ।
सर्वत्र विद्यमानोऽपि शिवभक्तहृदम्बुजे ॥ १९०॥

लिङ्गरूपं समाश्रित्य क्रीडालोलोऽधितिष्ठति ।
ऊधस्येव यथा क्षीरं पशुसर्वाङ्गसङ्गतम् ॥ १९१॥

शिवः सर्वव्यापकोऽपि शिवलिङ्गमधिश्रितः ।
अतः सर्वं परित्यज्य शिवलिङ्गं प्रयत्नतः ॥ १९२॥

पूजनीयं विधे नित्यं विधिवद्भक्तिपूर्वकम् ।
शिवलिङ्गे शिवः पूज्यो नान्यत्र तु कदाचन ॥ १९३॥

क्षीरलब्धिर्न यथा विषाणादौ स्तनं विना ।
शिवलिङ्गं विना तद्वच्छिवो नान्यत्र पूज्यते ॥ १९४॥

शिवपूजा बहुविधा कथ्यते निगमैर्विधे ।
आगमैरपि सा पुजा विविधैवेति कथ्यते ॥ १९५॥

षोडशैरुपचारैश्च (उपचारैः षोडशभिः)
पूजनीयोऽन्वहं शिवः ।
तेषु मन्त्राश्च विविधा निगमागमचोदिताः ॥ १९६॥

मन्त्राः शिवपराः सर्वनिगगागमचोदिताः ।
सम्यज्ज्ञातुं न शक्ययन्ते विविधा बहवो यतः ॥ १९७॥

तथापि तेषु मन्त्रेषु शिवपञ्चाक्षरः परः ।
तेन मन्त्रेण विश्वेशः पूजनीयः प्रयत्नतः ॥ १९८॥

शिवपञ्चाक्षरो मन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
न तस्मादधिको मन्त्रो वैदिकोऽन्यत्र दृश्यते ॥ १९९॥

शिवपञ्चाक्षरो मन्त्रो वैदिको वेदसम्मतः ।
वेदेषु पठ्यते तद्वद्वेदान्तेषु च पठ्यते ॥

ऋषिभिः संस्कृतो मन्त्रः शिवमन्त्रो मुमुक्षुभिः ।
शिवेनापि स्तुतो मन्त्रः शिवमन्त्रः शिवप्रदः ॥

श्रीरुद्रमन्त्रमध्यस्थः शैवः पञ्चाक्षरो मनुः ।
वेदावतंसो मन्त्रोऽयं शिवपञ्चाक्षर स्तुतः ॥

तेन मन्त्रेण कर्तव्यं शिवलिङ्गार्चनं बुधैः ।
श्रीमत्पञ्चाक्षरो मन्त्रः सर्वाघौघविनाशकः ॥

स्मृतेऽपि पापगिरयो भवन्त्येव हि भस्मसात् ।

॥ इति शिवरहस्यान्तर्गते विष्णुप्रोक्तं शिवाराधनमहिमावर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २५। १६१-२०३.१॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 161-203.1..

Proofread by Ruma Dewan

*Vishnuproktam Shivaradhanamahimavarnanam*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*